॥ वाल्मीकि रामायण॥

३ अरण्यकाण्ड

अध्याय ४४

तया परुषमुक्तस्तु कुपितो राघवानुजः ।
स विकाङ्क्षन्भृशं रामं प्रतस्थे नचिरादिव ॥ १॥

तदासाद्य दशग्रीवः क्षिप्रमन्तरमास्थितः ।
अभिचक्राम वैदेहीं परिव्राजकरूपधृक् ॥ २॥

श्लक्ष्णकाषायसंवीतः शिखी छत्री उपानही ।
वामे चांसेऽवसज्याथ शुभे यष्टिकमण्डलू ।
परिव्राजकरूपेण वैदेहीं समुपागमत् ॥ ३॥

तामाससादातिबलो भ्रातृभ्यां रहितां वने ।
रहितां सूर्यचन्द्राभ्यां सन्ध्यामिव महत्तमः ॥ ४॥

तामपश्यत्ततो बालां राजपुत्रीं यशस्विनीम् ।
रोहिणीं शशिना हीनां ग्रहवद्गृशदारुणः ॥ ५॥

तमुग्रं पापकर्माणं जनस्थानरुहा द्रुमाः ।
समीक्ष्य न प्रकम्पन्ते न प्रवाति च मारुतः ॥ ६॥

शीघ्रस्रोताश्च तं दृष्ट्वा वीक्षन्तं रक्तलोचनम् ।
स्तिमितं गन्तुमारेभे भयाद्गोदावरी नदी ॥ ७॥

रामस्य त्वन्तरं प्रेप्सुर्दशग्रीवस्तदन्तरे ।
उपतस्थे च वैदेहीं भिक्षुरूपेण रावणः ॥ ८॥

अभव्यो भव्यरूपेण भर्तारमनुशोचतीम् ।
अभ्यवर्तत वैदेहीं चित्रामिव शनैश्चरः ॥ ९॥

स पापो भव्यरूपेण तृणैः कूप इवावृतः ।
अतिष्ठत्प्रेक्ष्य वैदेहीं रामपत्नीं यशस्विनीम् ॥ १०॥

शुभां रुचिरदन्तौष्ठीं पूर्णचन्द्रनिभाननाम् ।
आसीनां पर्णशालायां बाष्पशोकाभिपीडिताम् ॥ ११॥

स तां पद्मपलाशाक्षीं पीतकौशेयवासिनीम् ।
अभ्यगच्छत वैदेहीं दुष्टचेता निशाचरः ॥ १२॥

स मन्मथशराविष्टो ब्रह्मघोषमुदीरयन् ।
अब्रवीत्प्रश्रितं वाक्यं रहिते राक्षसाधिपः ॥ १३॥

तामुत्तमां त्रिलोकानां पद्महीनामिव श्रियम् ।
विभ्राजमानां वपुषा रावणः प्रशशंस ह ॥ १४॥

का त्वं काञ्चनवर्णाभे पीतकौशेयवासिनि ।
कमलानां शुभां मालां पद्मिनीव च बिभ्रती ॥ १५॥

ह्रीः श्रीः कीर्तिः शुभा लक्ष्मीरप्सरा वा शुभानने ।
भूतिर्वा त्वं वरारोहे रतिर्वा स्वैरचारिणी ॥ १६॥

समाः शिखरिणः स्निग्धाः पाण्डुरा दशनास्तव ।
विशाले विमले नेत्रे रक्तान्ते कृष्णतारके ॥ १७॥

विशालं जघनं पीनमूरू करिकरोपमौ ।
एतावुपचितौ वृत्तौ सहितौ सम्प्रगल्भितौ ॥ १८॥

पीनोन्नतमुखौ कान्तौ स्निग्धतालफलोपमौ ।
मणिप्रवेकाभरणौ रुचिरौ ते पयोधरौ ॥ १९॥

चारुस्मिते चारुदति चारुनेत्रे विलासिनि ।
मनो हरसि मे रामे नदीकूलमिवाम्भसा ॥ २०॥

करान्तमितमध्यासि सुकेशी संहतस्तनी ।
नैव देवी न गन्धर्वी न यक्षी न च किंनरी ॥ २१॥

नैवंरूपा मया नारी दृष्टपूर्वा महीतले ।
इह वासश्च कान्तारे चित्तमुन्माथयन्ति मे ॥ २२॥

सा प्रतिक्राम भद्रं ते न त्वं वस्तुमिहार्हसि ।
राक्षसानामयं वासो घोराणां कामरूपिणाम् ॥ २३॥

प्रासादाग्र्याणि रम्याणि नगरोपवनानि च ।
सम्पन्नानि सुगन्धीनि युक्तान्याचरितुं त्वया ॥ २४॥

वरं माल्यं वरं पानं वरं वस्त्रं च शोभने ।
भर्तारं च वरं मन्ये त्वद्युक्तमसितेक्षणे ॥ २५॥

का त्वं भवसि रुद्राणां मरुतां वा शुचिस्मिते ।

वसूनां वा वरारोहे देवता प्रतिभासि मे ॥ २६ ॥

नेह गच्छन्ती गन्धर्वा न देवा न च किंनराः ।
राक्षसानामयं वासः कथं नु त्वमिहागता ॥ २७ ॥

इह शार्दूलमृगाः सिंहा द्वीपिव्याघ्रमृगास्तथा ।
ऋक्षास्तरक्षवः कङ्काः कथं तेभ्यो न बिभ्यसे ॥ २८ ॥

मदान्वितानां घोराणां कुञ्जराणां तरस्विनाम् ।
कथमेका महारण्ये न बिभेषि वनानने ॥ २९ ॥

कासि कस्य कुतश्च त्वं किंनिमित्तं च दण्डकान् ।
एका चरसि कल्याणि घोरान्राक्षससेवितान् ॥ ३० ॥

इति प्रशस्ता वैदेही रावणेन दुरात्मना ।
द्विजातिवेषेण हि तं दृष्ट्वा रावणमागतम् ।
सर्वैरतिथिसत्कारैः पूजयामास मैथिली ॥ ३१ ॥

उपानीयासनं पूर्वं पाद्येनाभिनिमन्त्र्य च ।
अब्रवीत्सिद्धमित्येव तदा तं सौम्यदर्शनम् ॥ ३२ ॥

द्विजातिवेषेण समीक्ष्य मैथिली
तमागतं पात्रकुसुम्भधारिणम् ।
अशक्यमुदेद्वेष्टुमुपायदर्शनान्
न्यमन्त्रयद्ब्राह्मणवद्यथागतम् ॥ ३३ ॥

इयं बृसी ब्राह्मण काममास्यताम्
इदं च पाद्यं प्रतिगृह्यताम् इति ।
इदं च सिद्धं वनजातमुत्तमं
त्वदर्थमव्यग्रमिहोपभुज्यताम् ॥ ३४ ॥

निमन्त्र्यमाणः प्रतिपूर्णभाषिणीं
नरेन्द्रपत्नीं प्रसमीक्ष्य मैथिलीम् ।
प्रहस्य तस्या हरणे धृतं मनः
समर्पयामास वधाय रावणः ॥ ३५ ॥

ततः सुवेषं मृगया गतं पतिं
प्रतीक्षमाणा सहलक्ष्मणं तदा ।
निरीक्षमाणा हरितं ददर्श तन्
महद्वनं नैव तु रामलक्ष्मणौ ॥ ३६ ॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com